M. T. B. COLLEGE, SURAT
Manuscripts Library

No Ref.
Ser. 1529

Title: Tarka Sangraha Chandrika

1529

Incomplete

C

		Tarka Sangraha Chandrika	Title
		Mukund	Author
			Editor
510			Year, Vols.
			Publisher
1529		Pages 165	Remarks

चंद्रिका ॥ श्रीहयग्रीवाय नमः ॥ गलद्दानोद्रेकभ्रमदलिकदंबावलतिशिरोभुवानः संनो यादविजिनगुरोस्तांडवविधेः ॥ प्रचंडैर्दोर्दंडैः प्रबलजनरविघ्नोपशमनो मनो
१ गम्यं भव्यं वितरतु शिशुः शैलदुहितुः ॥१॥ सांबाशिवं नमस्कृत्य तर्कसंग्रहचंद्रिका ॥ वादिगणकुलोत्थेन मुकुंदेन वितन्यते ॥२॥ शब्दराम्यविदुषो नूत
नहं कुर्वे निवेदनं ॥ बालबुध्या मदीयो यं निबंधो नावधीर्यतां ॥३॥ ग्रंथारंभे विघ्नोपशमाय विहितं मंगलं अंतेवासिशिक्षायै निबध्नाति ॥ निधायेति ॥ त
त्र मंगलस्य विघ्नध्वंसद्वारा समाप्तिसाधनतेति प्राचः ॥ तत्र यद्यपि मंगलस्य समाप्तिसाधनतायां न प्रत्यक्षं प्रमाणमस्ति ॥ कादंबर्यादिग्रंथे अन्वयतो नास्तिक
ग्रंथादौ व्यतिरेकतो व्यभिचारेण कारणत्वग्राहकप्रत्यक्षजन्मनेऽन्वयव्यतिरेकप्रमाणसहकारिणः स्वस्वव्याप्येतरयावत्कारणसत्वे सत्यग्रिमक्षणे अवश्यं यत्स
त्वं यदन्वयः तदभावदृष्टि नियमान्वयव्यतिरेकसहचारग्रहस्यासंभवात् ॥ अन्वयदलमात्रोपादाने घटकारणसत्वे तदग्रिमक्षणे घटसत्तादुर
पानतदापत्तिः स्यादतो व्यतिरेकदलं ॥ तथा सति ॥ अन्यदाभावे घटप्रागभावाभावान्न दोषः कपालाकाशसंयोगतद्व्याप्यकपालादृष्टसंयोगातिरिक्तयावद्घटकार
णसत्वे कपालाकाशसंयोगानोचघटभावेन कपालाकाशसंयोगवारणायान्वयदलं तद्घटकमवश्यमिति चेत् ॥ तथापि सति कपालाकाशसंयोगतद्व्या
प्यकपालादृष्टसंयोगतद्रकारणसत्वेन सत्वे अग्रिमक्षणे ऽवश्यं तत्सत्तायामावाक्तदोषः ॥ यावत्कारणसत्वे इति यद्व्यतिरेकेण वासि ध्वोतः खेनरेति दंड राम०
व्यापारत्वमादिसकलकारणसमवधाने दंडव्यतिरेके घटव्यतिरेकोसिद्धः अतःस्वव्याप्येतरेति ॥ घटप्रागभावसंग्रहाय अग्रिमक्षणेति ॥ अन्यथा घ १
टोत्पत्तिकाले घटप्रागभावाभावेपि घटव्यतिरेकासत्ताद्दसंग्रहापत्तेः ॥ सत्वं चोत्पत्तिः अभावस्तस्या एव अन्यथा तद्दोषतादवस्थ्यापत्तेः तथापि मंगलं
समाप्तिसाधनं समाप्तिकामनाजन्याचारविषयत्वादित्यनुमानेन वस्तो च्या ॥ अत्र च यो यत्कामनाजन्यस्तत्र्म ॥ जन्याचारविषयस्सतत्साधनं ॥ यथा

दर्शादि स्वर्गसाधनं ॥ अचारः कृतिः स्वर्गकामनाजन्याचारविषयस्य चैत्यवंदनेपि सत्वात्तत्र व्यभिचारवारणाय प्रमाजन्येति ॥ तथाचनदाचारस्येष्ट
साधनतांशे भ्रमजन्यत्वान्न व्यभिचारः ॥ न च नास्तिकादिग्रंथे व्यभिचारान्न समाप्तिसाधनतानुमानमिति वाच्यं तत्रापि जन्मांतरीयमंगलकल्पनात्
तस्य संदिग्धत्वेपि तत्संदेहस्य साध्यसंदेहपर्यवसन्नतया अनुमिताव प्रतिबंधकत्वात् साध्याभावांशे निर्णयात्मकस्य हि तादृशे संदेहनिर्ण
यसाधारणव्यभिचारज्ञानस्यैव प्रतिबंधकत्वात् ॥ तस्य चाशुतरविनाशिनः कालांतरभाविसमाप्तिजनकतानुपपत्त्या विघ्नध्वंसो द्वारं प्रतिबंध
काभावत्वेन तस्यावश्यकत्वात् न त्वपूर्वं तथा सति मंगलस्य लौकिककर्मंगत्वाभावप्रसंगात् अलौकिके लौकिकेनागमितिसूत्रान्तस्यापूर्वस्योपकार त
जनकत्वात् ॥ कादंबर्यादौ सत्यपि मंगले विशेषे समाप्त्यभावः ॥ प्रचुरमंगलानाश्यविघ्नसत्वादेव एवं च स्वप्रतियोगी चरमवर्णानुकूलजकृतिम
त्त्वसंबंधेन विघ्नध्वंसविशिष्टसमाप्तित्वात्मनिष्ठत्वासत्वा मंगलं कारणमिति पर्यवसितं ॥ नातः चरमवर्णध्वंसरूपसमाप्तिशरकाशनिष्ट
त्वेपि क्षतिः ॥ वस्तुतो ज्ञानविशेष एव समाप्तिरिति न दोषशंकापि ॥ जन्मांतरीयमंगलं च समाप्तिमुद्दिश्य मंगले शिष्टप्रवृत्त्यापत्तिस्तु न शंक्या जन्मांतरी
य समाप्तित्वस्य कस्यचिदजन्यतावच्छेदकत्वाभावेन तस्याः सुदूरपराहतत्वादिति ॥ मणिकृतस्तु मंगलं स्वविघ्नध्वंसमेव फलं विघ्नसंशये निर्णये गोशि
ष्टानां तदाचरणादिद्वाभावस्याकांक्षितत्वात् ॥ निर्विघ्नं परिसमाप्यतामिति कामनापि नागृहीतविशेषणान्याये न विघ्नध्वंसविषयत्वेनोपपन्नात्
समाप्तिसाधनत्वव्यवस्थापिका स्वर्गस्याप्तिरिति वत् समाप्तिलोकावगतकारणैर्वेत्याहुः मंगलं च वस्तुत्या धन्यतमत्वं स्तुतिश्लोको न कर्षवन्सक्षात्तापन
ज्ञानानुकूलव्यापारः नच स्वरूपाख्यानं अतिव्याप्तिः तस्यापि स्तुतित्वेन वर्तां स्वरूपं कथयामो न स्तुमः इति प्रामाणिकव्यवहारासंगतेरिति वाच्यं ज्ञान

चंद्रिका २ दृश्यत्वमपरत्वात् अत एवारोप्यगुणकथनं स्तुतिरिति प्रामाणिकाः भगवत्तु त्वाहीनेन तत्पदप्रयोगो भाक्तः स्वावधिकोत्कर्षवत यावत्प्रापणं न ॥ मरकाराद्युत्
स्यं बहूना ॥ ॥ निधाय अतिशयेन ध्याता ध्यानं धात्वर्थः एवउपसर्गद्योतकः नन्वितरनिबंधनसत्वे किमेतस्य प्रयोजनमित्यत आह ॥ इ बालानामिति
॥ बालानां सुखबोधस्य निरूपणं मुखेनानायासेन यो बोधस्तस्मै ॥ तर्क्यंते विचार्यंते इति तर्काः पदार्थाः तेषां संग्रहः संक्षेपेण व्युत्पादनं क्रियते वर्तमानकाति
विषयप्रत्ययः ॥ आत्मा वारे द्रष्टव्यः श्रोतव्यो मंतव्यो निदिध्यासितव्य इति श्रुत्या आत्मतत्वदर्शने इष्टसाधनत्वावगमात्तत्र चेच्छाकांक्षायां तन्निस्तत्त्वन्यायेन
न स्युनरवतिष्ठत इत्यवारोपस्थितं मुक्तिरूपमेव तदवगम्यते एवं श्रुतिवाक्यजन्यात्मविषयकशाब्दज्ञानरूपश्रवणस्यात्मनः इतरभिन्नत्वेनानुमा
नरूपमननस्य विजातीयप्रतीत्यभावविशिष्टसजातीयप्रतीतिसंतु वृत्तिरूपध्यानप्रवाहात्मकनिदिध्यासनस्य च तथैवेष्टसाधनत्वावगमात्तत्र
च तदाकांक्षायां याक्रमापेक्षया अपेक्षमस्य वलियस्त्वेन आत्मतत्वज्ञानमेव तादृशत्वेनावगम्यते तत्र चेदृशमननस्येतरपदार्थज्ञानसा
ध्यत यातस्य चोद्देशकलक्षणपरीक्षात्मकशास्त्राधीनत्वेन तत्राद्युद्देशं विना धर्मिधीसाध्यलक्षणादेः ॥ कर्तुमशक्यत्वेन प्रथमतः पदार्थान्
दिशति ॥ द्रव्येति ॥ द्रव्यगुणकर्मसामान्यविशेषसमवायाभावाः पदार्थाः सप्तैवेत्यन्वयः तथा च पदार्थोद्देशो न चरमपदलक्षणया द्रव्याद्यन्यत
मत्वविधानात् उद्देश्यविधेयभावस्थले च विधेयतावच्छेदकरूपेणाविधेयस्य उद्देश्यतावच्छेदकव्यापकत्वबोधस्य व्युत्पत्तिसिद्धत्वाद २
व्यात्वादिभेदवृत्तिसप्तत्वावच्छिन्नप्रतियोगिताकभेदाभाववत्वरूपस्यान्यतमत्वस्य प्रकृते विधेयत्वेन तस्य पदार्थस्वरूपोद्देशता
वच्छेदकव्यापकत्वावगमेनाधिक्यव्यवच्छेदकसिद्धिः न्यूनव्यवच्छेदस्तु सप्तत्वान्वयदेव लब्धः वक्ष्यमाणनिरूपणक्रमस्यैवच्छेदकमेन्याम

चंद्रिक० ३ विभज्यते परमपरं चेति परत्वं व्यापकत्वं ॥ अपरत्वं व्याप्यत्वं विशेषं विभज्यते ॥ नित्यद्रव्यवृत्तय इति सामान्यानंतर्गतत्वे सत्यंको व्युत्पत्तिसायानंता इति ॥ प्रति
व्यक्तिभिन्ना इत्यर्थः समवायं विभजते समवायस्त्विति अभावं विभजते अभावश्चतुर्विध इति अभावत्वं चाखंडोपाधिः समवायैकार्थसमवायान्यतर
संबंधेन सत्ताभाववत्वं वा समवायसंबंधेन सत्ताभावस्य सामान्यादावपि सत्वादेकार्थेपि एकार्थसमवायेन सत्ताभावस्य नित्यद्रव्ये सत्वात् समवा
येति यथाप्यन्यत्र संसर्गाभावत्वान्योन्याभावत्वाभ्यां द्वैविध्यमुक्तं तथाप्यवांतरप्रागभावत्वादिभिर्विभागावश्यकत्वे किमंतर्गः ॥ नासंसर्गाभावत्वे
न विभजनेनेति शेषः निगर्वः अमत्राप्येवं लक्षयति गंधवतीति ॥ पृथिव्याः गंधवत्वं लक्षणं लक्ष्यतावच्छेदकं च गंधसमानाधिकरणतावच्छे
दकतयास्ति द्वः पृथ्वीत्वाख्यो जातिविशेषः अन्यथा गंधजनकतेजः संयोगात् पृथ्वीपरमाणावितरेतस्यापि गंधप्रसंगात् ननु लक्षणमितरेभ्यो
भेदानुमापकं तथा च सुगंधि सलिलं केसराभिः समीरण इत्यादिकाव्यात् गंधवत्वं जलादावप्यस्तीति तस्य पृथ्वीतरभेदानुमापकत्वासंभवे नकथ
गंधवत्वं पृथिव्या लक्षणमिति चेन्न तादृशप्रतीत्यास्ताश्रयसंयुक्तत्वरूपपरंपरासंबंधेन कुंकुमाद्युपाधिगतगंधस्यैवविषयीकरणात् समवा
येन तस्य जलादावभावेन समवायेन तस्येतरभेदानुमापकत्वबाधाभावात् ननु पृथिव्या अनित्यत्वे अवयवानवस्थापत्तिः नित्यत्वे कार्यस्य राम
गंधवतः द्रव्यांतरत्वापत्तिरित्यत आह सा द्विविधेति ॥ नित्या परमाणुरूपेति अनवस्थाभयेन तस्य निरवयवत्वादवयवनाशितत्संयोगनाशरू ३
पनाशकाभावेन तस्य नित्यत्वं न च परमाणौ मानाभावः त्रसरेणुः सावयवः द्रव्यारंभकचाक्षुषद्रव्यत्वात् घटवदित्यनुमानेन [illegible]णुकस्यैवप
रमाणोरपि सिद्धेः नव्यास्तु त्रुटिन वियवजन्या किंतु नित्यैव तस्यामेवात्यंतापकृष्टमहत्वप्रकर्षः परमाणुत्वव्यपदेशः न च पूर्वोक्तानुमानात्त

कत्वात् न सामकत्वेनैव पदार्थानुद्दिश्य तत्त्वादेव प्रथमं द्रव्याणि विभजते ॥ तत्रेति ॥ निर्धारणसप्तम्यंतात् तेषु पदार्थेषु मध्ये पृथिव्यप्तेजो
वाय्वाकाशकालदिगात्ममनांसि नवैव द्रव्याणीत्यन्वयः विभागश्च सामान्यरूपेणावगतानां विशेषरूपेणाभिधानं ॥ नवत्वेन न्यूनसंख्याव्यवच्छेदः एव
कारेणाधिकसंख्याव्यवच्छेदः एवकारेणाधिकसंख्याव्यवच्छेदः ॥ यथा पार्थ एव धनुर्धर इत्यत्र विशेष्यसंगतेवकारेणापार्थान्यस्मिन् धनुर्धरत्वव्य
वच्छेदो बुध्यते तथेहापि नवातिरिक्तद्रव्यत्वव्यवच्छेदबोधात् विशेष्यविशेषणक्रियासंगतैवकारस्य क्रमेणान्ययोगायोगात्यंतायोगव्यवच्छेदबोध
कत्वात् ॥ शंखः पांडुर एव नीलं सरोजं भवत्येवेत्यादौ शंखः पांडुर एवायोगस्य सरोजे नीलाभावनात्यंतायोगस्य च व्यवच्छेदकत्वात् ॥ तमस्तु न द्रव्यम्
हाग्रभावावच्छिन्नाभावरूपत्वात् अनुगतं सप्तद्रव्यत्वं जातिविशेषः ॥ सत्त्वसंयोगविभागसमवायिकारणतावच्छेदकतया सिद्धः ॥ गुणान्वि
भजते ॥ रूपरसेति ॥ गुणाश्चतुर्विंशतिरिति योजना ॥ रूपरसगंधस्पर्शाः संख्याः परिमाणानि पृथक्त्वं संयोगविभागौ परत्वापरत्वे बुद्धयः
सुखदुःखेच्छाद्वेषप्रयत्नाः गुणा इति सूत्रेण कण्ठोक्ताः सप्तदश ॥ गुरुत्वद्रवत्वस्नेहसंस्कारधर्माधर्मशब्दाः समुच्चभाष्यकारेणोक्ताः ॥ मिलित्वा
चतुर्विंशतिरित्यर्थः ॥ अदृष्टत्वस्यानुगतस्य सत्त्वेपि गुरुत्वसाक्षाद्व्याप्तेनैव गुणानां विभागनियमे भावाभावेन धर्माधर्मत्वाभ्यां विभागः पर
तु सूत्रोक्तपरित्यागे बीजमन्वेष्यं गुणपदार्थकथनावच्छेदकतया सिद्धा गुणत्वाख्या जातिविशेषो रूपादिचतुर्विंशत्यनुगतः न च शब्दतावच्छेदकतयापि
गुणत्वमपि जातिसिद्धेरिति वाच्यं भूतत्वेन सांकर्यापत्त्या विनिगमनाविरहेणोभयोरपि जातित्वासंभवात् नतु उक्तमाचार्यैः गुणत्वं भाम सामान्यविशेषवत्त्वे गुणे
षु चतुर्विंशतिसंख्या चैकार्थसमवायादिना अपेक्षाबुद्धिविशेषविषयत्वरूपं वा चतुर्विंशतित्वं बाध्य कर्म विभजते ॥ कर्माणि पंचैवेत्यन्वयः सामान्यं

सिद्धिः तस्मात् प्रयोजकत्वादित्याहुः ॥ अनित्या कार्यरूपेति परमाणूनाम महत्त्वात् संयोगविशेषविशिष्टानामपि तेषां प्रत्यक्षत्वानुपपत्त्या संयोगविशे
षविशिष्टैः परमाणुसमुदैः न घटादिप्रतीत्युपपत्तिरिति भावः ॥ नन्ववयवी अध्यास्त महत्त्वस्य संयोगविशेषरूपत्वेन तस्यैव प्रत्यक्षत्वप्रयोजकत्वा
त् तद्विशिष्टपरमाणुसमूहप्रत्यक्षेण किमपि बाधकमित्याहुः सा पुनरिति सा कार्यलक्षणा शरीरेंद्रियेति ॥ शरीरत्वं च न जातिः पृथ्वीत्वादिना सांकर्या
त् ॥ द्रव्यसमवाय्यवृत्तिचेष्टावद्वृत्तिजातिमत्त्वं सखंडोपाधिः ॥ तादृशी च जातिर्मनुष्यत्वगोत्वादिरूपा अवृत्तीस्यने न हस्तत्वादिव्युदासः न च वृक्षादीना
वृत्तिरूपकारणाबाधेनमानाभावे न चेष्टावत्त्वविरहादुक्तलक्षणमव्याप्तमिति वाच्यं स्थावरा वृक्षाः तृणौषधिगुल्मलतावनस्पतयः इत्यादि
नाभाव्य हेतुना वृक्षादेर्विषयभेदस्योक्तत्वेन तस्याप्रसक्तत्वात् दृष्टापत्तं चात्मान्यत्वस्तति ज्ञानकारणमनःसंयोगाश्रयत्वं व्यापारप्रत्यासत्त्या साक्षा
त्कारकरणत्वं वा विषयत्वं च शरीरेंद्रियभिन्नकार्यद्रव्यत्वं शरीररूपां पृथिवीमाह शरीरमस्मदादीनामिति ॥ शरीरस्य पांचभौतिकत्वे पृथिवीस
मवायिकारणकत्वात् पार्थिवत्वं पृथिवीसमवायिकारणकत्वं च क्लेदाद्यपगमेपि गंधानुवृत्तेरित्याशयः ॥ आदिपदेनायोनिजदेवादिशरीरप
रिग्रहः ॥ इंद्रियरूपां पृथिवीमाह इंद्रियमिति सत्त्वात्प्रमाणाभावः ॥ गंधसाक्षात्कारो मनोभिन्नेंद्रियजन्यः मनस्तेतरसाक्षात्कारत्वात् चा
क्षुषवदित्यनुमानस्यैव विवक्षितत्वात् एवमग्रेपि गंधपदस्याने रसादिपदं निक्षिप्य ज्ञेयं घ्राणं घ्राणसंज्ञिकं तस्य पार्थिवत्वसाधक
हेतुगर्भविशेषणमाह गंधग्राहकमिति ॥ जलाद्यनभिभूतमित्यादि तेन श्लेष्माभिभवकाले गंधाग्रहेपि न क्षतिः घ्राणेंद्रियं पृथिवीपरकी

चंद्रिका० यरूपाव्यंजकत्वे सति गंधव्यंजकत्वात् कुंकुमगंधाभिव्यंजकगोघृतवदित्यनुमानात्तत्सिद्धिः रूपे परकीयत्वनिवेशान्न दृष्टांतासिद्धिः यद्वा गंधः
६ स्वाश्रयद्रव्यरतिद्रव्यत्वसाक्षाद्व्याप्यजातीयकरणकानुभववृत्ताध्यः॥ प्रतिनियतेंद्रियग्राह्यशब्देतरविशेषगुणत्वादित्यनुमानात्तत्सिद्धिः इदमे
व च गंधपदस्थाने रसादिपदं निक्षिप्य द्रष्टव्यं नासायेति अग्रेति अग्रावच्छेदेन नासावृत्ति एवमुत्तरत्रापि घ्राणरसनत्वचां स्वाधिष्ठानसंबंधार्थग्रा
हकत्वमन्येषां तत्र ग्राहकत्वमपि स्वतंत्रास्तु गंधसाक्षात्कारः अतींद्रियकरणकः जन्यसाक्षात्कारत्वात् चाक्षुषवदित्यादेरप्रयोजकत्वेन अदृष्टविशे
षजनिता नास्तिकैव घ्राणपदवाच्येति वदंति विषयरूपां पृथिवीमाह विषयस्त्विति इयं च रूपरसगंधस्पर्शसंख्यापरिमाणपृथक्त्वसंयोगवि
भागपरत्वगुरुत्वसंस्कारवती क्रमप्राप्तं जलं लक्षयति शीतेति॥ शीतस्पर्शवत्त्वमपां लक्षणमित्यर्थः॥ जलत्वं जातिः सा च तद्रिप यतेन जलं ज
मित्याकारकाध्यक्षसिद्धा॥ जलत्वदृष्टिः जलोपादेयजलसमवेतामहज्जलत्वादित्यनुमानात् परमाणुद्व्यणुकयोस्तावत्सिद्धिः असति बाधके अ
नुगतप्रतीत्या जातिसिद्धेर्निष्प्रत्यूहत्वात् न तु जलशरीरसत्त्वे तस्य कुतो नाध्यक्षमतो आह वरुणलोक इति तथा च विप्रकृष्टत्वान्नोपलभ्यत इ
ति भावः एवमुत्तरत्रापि न चानुमानाभावः जलत्वं शरीरसमवायिवृत्ति द्रव्यारंभकनित्यवृत्तिजातित्वात् पृथिवीत्ववदित्यनुमानस्यैव विवक्षित
त्वात्॥ इदमेव च जलस्थाने जलत्वादिपदं निवेश्याग्रेऽपि यंजनादिशरीरस्य पृथिव्यनारंभ्यत्वेऽपि पार्थिवभागानामुपष्टंभकारत्वसंयोगसमर्यत्वे वि
जातीयानां समवायित्वमात्रं नाभ्युपेयत इति॥ इदं यरसग्राहकमिति पिताघनभिभूतमित्यादि रसनं जलं परकीयरूपाव्यंजकत्वे सति परकीयरस
व्यंजकत्वात् सक्तुरसव्यंजकोदकवत् द्वितीयपरकीयत्वनिवेशात् स्वरसव्यंजकशर्करादानव्यभिचारः इदं च गंधं विहाय स्नेहं विनियोज्य पूर्वोक्ति

चतुर्दशगुणवत् शेषं पूर्ववत् तेजो लक्षयति उष्णस्पर्शवदिति विलक्षणनीलादिजनकतावच्छेदकतया तेजस्त्वसिद्धिः इंद्रियं रूपग्राहकं चक्षु
रिति चक्षुरिंद्रियं तैजसं परकीयस्पर्शाव्यंजकत्वे सति परकीयरूपव्यंजकत्वात् प्रदीपवत्॥ द्वितीयपरकीयत्वनिवेशात्॥ स्वीयरूपव्यंजके गोलके
न व्यभिचारः चक्षुरिंद्रियं च स्वसंबंधार्थग्राहकं न चैवं स्फटिकादिव्यवहितपदार्थो न गृह्येतेति॥ वाच्यं अभिघातिना स्वच्छद्रव्येनैव चक्षुषो गम
नप्रतिबंधनियमेन स्फटिकादिनागमनप्रतिबंधासंभवेन स्फटिकादिव्यवहितस्यापि चक्षुःसंबंधत्वानपायात् न चैतपापिशाखाचंद्रम
सोर्युगपत्प्रत्यक्षानुपपत्तिः दृष्टत्वात् योगपद्याभिमानस्य युगपत्त्वात् तत्पत्रभेदाभिमानवत् संभवात् भौममिति काष्ठादिरूपपार्थिवेंधनजं
अविंधनमिति अप एवेंधनमुद्दीपनं यस्येत्यर्थः विद्युदादीत्यादिना बडवानलपरिग्रहः भुक्तस्येति भुक्तस्योदनादेः परिणामः पाकजरस
मलधातूनामुत्पादः तत्र हेतुर्निमित्तं आकरः खनिः तत्र जातस्सुवर्णादित्यादिना रजतादिपरिग्रहः सुवर्णमिति अत्यंतानलसंयोगेऽप्यनुच्छि
द्यमानद्रवत्वात् यन्नैवं तन्नैवं यथा जलसंयोगेऽप्यनुच्छिद्यमानद्रवत्ववत् यथा घृतादि न्यास्तु गुरोः पीतरूपवतः सुवर्णस्य पार्थिवत्वमेवञ्च
त्यंताग्निसंयोगे प्रतिबंधकतकस्मनयाम्नुत्पन्नत्वात् इदं च रूपस्पर्शसंख्यापरिमाणपृथक्त्वसंयोगविभागपरत्वापरत्वद्रवत्वसंस्कारवत् वायुं
लक्षयति रूपरहितेति रूपरहितत्वे सति स्पर्शवत्त्वं वायोर्लक्षणमित्यर्थः सत्यंतेन पृथिव्यप्तेजसां विशेष्यदलेन गगनादीनां निरासः स
च स्पर्शसंख्यापरिमाणपृथक्त्वसंयोगविभागपरत्वापरत्ववेगवान् स्पर्शोऽप्यनुष्णाशीतत्वे सत्यपाकजः तथा च वायव्यं स्पर्शोऽप्यनु
ष्णाशीतत्वे सत्यपाकज इति अत्र द्रव्यत्वेन संख्यापरिमाणपृथक्त्वसंयोगविभागाः सिद्धाः मूर्तत्वेन परापरत्वे त्र्यणुकं वायुसंयोगो

वैद्रिक० रिसूत्रमूलीभूतात्‌ नोदनाघातनभस्त्वगणादिकर्मवेगवद्द्रव्यादेभिघातनं विलक्षणक्रियासादित्यनुमानेनतत्सिद्धिस्तु साधनतावच्छेदकत
५ येति बोध्यं ननु सौकार्यरूपएवतद्द्रव्यपवधारणयामनवस्थायाघप्रुरेवतञ्चाऽप्रुगतस्पार्तीन्द्रियत्वतयातद्रीयस्पर्शग्रहोन स्यादित्यतआह
सद्द्विविधइतिशरीरेयोग्यानुपलब्धिबाधं निरस्यति वायुलोकस्याश्रयाकारोमनो जिन्नेन्द्रिय